## दीर्घप्रश्नाः

१. वाचं संयच्छ नोचेत् तव कण्ठरोधं करिष्यामि- इदं वाक्यं केन कस्मै कदा उक्तम्?

उत्तरम्- सूत्रधारविदूषकयोः निर्गमनात् परं प्रहसनस्य मुख्यं पात्रं कपाली प्रविशति। ततः परं तस्य सूचनया एव तस्याः भार्या रङ्गिणीनामधेया अपि प्रविशति। उभयोः संलापः विचित्रः अस्ति। छिन्नं छत्रं केनचित् मार्गे क्षिप्तम् इति दृष्ट्वा कपाली उद्बन्धनाय मर्तुं रज्जुं याचते। भार्या रङ्गिणी च पत्यै रज्जुं यच्छति। यदा एतेन समधिकं कुपितः हताशः च कपाली विधवा भविष्यति इति भाययति तदा रङ्गिणी न बिभेति। अपि च कथयति यत् तस्याः विधवाजीवने सधवाजीवने च महान् भेदः न स्यात्। यतः सा इदानीम् अपि सुखिनी नास्ति। एतावता अपि सा न तुष्यति। परिहासेन सा कथयति यत् तां रज्जुं याचितवान् कपाली गुरुजनः अस्ति। गुरुजनस्य आज्ञायाः उल्लङ्घनं न कर्तव्यम् इति मत्वा सा रज्जुं दत्तवती। तेन इतोऽपि क्रुद्धः कपाली तां व्यङ्ग्येन कथयति यद् तस्याः धर्मज्ञानं प्रखरम् अस्ति। वस्तुतः अत्र सः अभिधया रङ्गिण्याः धर्मज्ञानस्य प्रशंसां कुर्वन् अपि रङ्गिण्याः विपरीतबुद्धेः निन्दाम् एव करोति। ततः स इतोऽपि व्यङ्ग्येन कथयति यत् रङ्गिण्याः भक्तिगङ्गा कपालिनः प्रीतये न अपि तु तस्य नाशाय एव प्रवर्तते इति। इतोऽपि अग्रे गत्वा स रङ्गिणीं निन्दति यत् रङ्गिण्याः स्पर्धया एव दासी तस्य च्छत्रं क्षेप्तुं साहसं प्राप्तवती। एतेन चकिता रङ्गिणी कथयति यत् सा दुर्दैववशात् नष्टचन्द्रदर्शनं कृतवती इति कारणेन तस्याम् इत्थं मिथ्याकलङ्कारोपः जायते। एवं भविष्यति इति सा पूर्वम् एव ज्ञातवती।

भाद्रपदशुक्लचतुर्थ्याम् उदितस्य चन्द्रस्य नष्टचन्द्रः इति

व्यवहारः। एवं पौराणिकी कथा श्रूयते यत् गणेशस्य स्थूलं शरीरं दृष्ट्वा कदाचित् चन्द्रः तं पर्यहसत्। एतेन क्रुद्धः गणेशः चन्द्रम् अशपत् यत् यः भाद्रपदशुक्लचतुर्थ्यां चन्द्रं पश्येत् स मिथ्याकलङ्केन पीडितः भविष्यति। अतः सर्वे जनाः तस्मिन् दिने चन्द्रदर्शनं परिहरन्ति। रङ्गिणी दुर्दैववशात् भ्रमेण एव नष्टचन्द्रस्य दर्शनं कृतवती इति कारणेन तस्यां मिथ्याकलङ्कारोपः जातः इति तस्याः कथनम्। सा दासीं छत्रं क्षेप्तुं नैव उक्तवती इति तस्याः तात्पर्यम्। पत्या मिथ्याकलङ्कारोपात् सा क्रुद्धा सती अवदत् यत् कपाली यदि तस्मिन् कीटभक्षिते छत्रे तावत् प्रीणाति तर्हि तस्याम् आयसमञ्जूषायां तत् छत्रं रक्षतु यत्र तस्य शततोलकमितं सुवर्णं रजतं हीरकम् अन्यानि च विविधानि अमूल्यानि रत्नानि वर्तन्ते।

एतत् श्रुत्वा कपाली कुपितः सन् तस्याः कण्ठरोधं कर्तुं धावति। यतः एतादृशं वाक्यं यदि अन्यः शृणुयात् तर्हि कदाचित् कपालिना महता कष्टेन गुप्ततया च सञ्चितं धनम् अपहर्तुं प्रयासः भवेत्। तस्य धनस्य वार्तां ज्ञात्वा अन्यः तस्य शत्रुः भवेत्। इत्थं बहुविधाः समस्याः भवितुम् अर्हन्ति। अतः कपाली इमां वार्तां प्रकाशयितुं नैव इच्छति। तस्य भार्या अपि इमां वार्तां प्रकाशयेत् इति स न सहते। तदर्थं स रङ्गिण्याः कण्ठरोधार्थं धावति। अत एव स ईदृशं वाक्यम् अपि प्रयुङ्क्ते।

२. छत्रं तथा पादुकायुगलं मे नष्टं चिराय इति कः कस्मिन् प्रसङ्गे उक्तवान्?

**उत्तरम्-** इदं वाक्यं कपाली अवदत्। कपाली धनलोभी अतिकृपणः च। एकदा खञ्जः भृत्यः पङ्गुरामः कपालिनः छिन्नपादुकायुगलं पथि अक्षिपत्। कुब्जपृष्ठा दासी मन्थरा कपलिनः

जीर्ण पुरातनं शतच्छिद्रं छिन्नच्छत्रम् अपि मार्गे न्यक्षिपत्। मार्गेण आगच्छन् कपाली पतितं छत्रं दृष्ट्वा कुपितः सन् विचार्य ज्ञातवान् यत् पादुका अपि भृत्येन क्षिप्ता। कपाली भृत्यौ भर्त्सयन् आसीत् तदा एव सहसा मुखेन पादुकाम् आदाय कश्चन सारमेयः अधावत्। कपाली सर्वं विस्मृत्य जीर्णं छत्रं कक्षे निधाय सारमेयस्य पृष्ठतः अधावत्। अल्पेन एव कालेन स च्छत्रेण शुनकं प्रहृत्य तस्य मुखात् पादुकाम् आच्छिद्य गृहं समागतः। किन्तु प्रहृतः सारमेयः तं दष्टवान्। तेन कपाली अपि रुधिराक्तः एव समागतः। प्रहारसमये जीर्णं तत् छत्रम् अपि भग्नम्। अतः कपाली यद्यपि पादुकाम् आच्छिन्नवान् किन्तु तेन सारमेयदंशनं प्राप्तं पुनश्च तस्य अत्यन्तं प्रियतरं छत्रम् अपि भग्नम्।

रुधिराक्तं कपालिनं गृहं प्रत्यागच्छन्तं दृष्ट्वा भार्या रङ्गिणी व्यस्ता अभूत्। भीता चिन्तिता च रङ्गिणी वैद्यस्य आह्वानाय मन्थरां प्रैषयत्। इमां वार्तां ज्ञात्वा कपाली अकुप्य। वैद्यस्य दर्शनीं कः दास्यति इति पृच्छन्तं कपालिनं रङ्गिणी अबोधयत् यत् प्राणाः दर्शन्याः मूल्यवत्तराः सन्ति। तावता मन्थरा वैद्यम् आनयत्। कपालिनः हस्तनाडीं परीक्ष्य वैद्यः असूचयत् यद् अयं गृहस्वामी नूनम् एव क्रुद्धेन शुनकेन दष्टः। वैद्यः सर्वं वृत्तान्तं ज्ञास्यति इति भयेन कपाली तूष्णीम् अशेत। एतेन रङ्गिण्याः चिन्ता अवर्धत। वैद्यः अपि कपालिनं मूर्छितप्रायं दृष्ट्वा तस्य विषविकारम् अनुमितवान्। सः असूचयत् यत् लालाक्लिन्नः शुनकः एनं दष्टवान्। लालाक्षरणात् स सारमेयः उन्मत्तः इति अनुमीयते। तस्य उन्मत्तस्य शुनकस्य दंशनात् तस्य जलातङ्करोगस्य सम्भावना अस्ति। तत्प्रयुक्तः विकारः कपालिनम् आक्रामति इति। एतस्मात् रक्षणाय झटिति गव्यघृतम् उष्णदुग्धेन समं रोगी पिबेत्। इदम् आकर्ण्य कपाली गव्यघृतस्य व्ययेन आशङ्कितः स्वगतं वैद्यं निन्दितुं प्रारभत। एतेन तस्य

अधरस्पन्दनं दृष्ट्वा रङ्गिणी अधिकं दुश्चिन्तासक्ता। वैद्यः अपि एतद् दृष्ट्वा विकारस्य लक्षणं वर्धते इति सूचयित्वा शुनकदष्टस्य स्थानस्य तप्तायःशलाकया दाहस्य निदानम् अवदत्। अन्यथा अयं रोगी स्वयम् उन्मत्तशुनकः इव बुक्कन् सर्वान् दङ्क्ष्यति स्वयं च ततः मरिष्यति, तस्य दंशनेन अन्ये अपि तथा बुक्कन्तः मरिष्यन्ति इति सूचितवान्। कपाली भीतः क्रुद्धः च अचिन्तयद् यद् वैद्यः तस्य शरीरे बृहत्तरं क्षतम् उत्पाद्य अधिकं धनं प्रेप्सुः अस्ति। तेन यदा लोहशलाकादीन् व्यवस्थापयितुं रङ्गिणी निर्गता तदा कपाली सारमेयवत् नखदन्तादिभिः वैद्यम् आक्रमितुम् उद्युक्तः। तेन भीतः वैद्यः कथम् अपि पलायितः।

तदा कपाली वैद्यस्य पलायनेन निश्चिन्तः अपि च्छत्रस्य पादुकायाः च नाशेन पीडाम् अनुभवन् इदं वाक्यम् अवदत्।

३. तान्त्रिकस्य बुद्धिमत्तां वर्णयत।

उत्तरम्- सारमेयवद् आचरणं कृत्वा भाययित्वा वैद्यं यदा कपाली गृहात् निष्कासितवान् तदा रङ्गिणी पत्युः उपचाराया तान्त्रिकम् आहुतवान्। अयं तान्त्रिकः पल्ल्यां प्रसिद्धः आसीत्। स अतीव बुद्धिमान। तं प्रतिवेशिनः अनुरुद्धवन्तः यथा कपालिनं वञ्चयित्वा किञ्चिद् धनं रङ्गिण्यै स दद्यात् इति। स तथा कर्तुं कृतसङ्कल्पः आसीत्।

तान्त्रिकः आत्मानं तन्त्रमन्त्रविद् इति परिचाययति। कपालिनः शरीरात् प्रवहन्त्याः रुधिरधाराया निवारणाय शर्कराचूर्णं क्षतस्थाने लेपनसमये स कम् अपि विचित्रं मन्त्रम् उदचारयत्। शर्करायाः क्षतस्थाने लेपनात् सद्य एव शोणितप्रवाहः स्थगितः। रुधिररोधस्तु शर्करया एव न तु मन्त्रगुणात् इति ज्ञात्वा कपाली तान्त्रिकं

प्रवञ्चकं ज्ञातवान्। किन्तु स तान्त्रिकस्य प्रवञ्चकत्वं प्रमाणयितुं यदा प्रयतितवान् तदा तान्त्रिकः चातुर्या कपालिनः चरितोद्घाटनं करोति स्म। एतेन कपाली तान्त्रिकस्य निवारणाय मार्गान्तरम् अन्वेष्टव्यम् इति अजानात्। ततः सद्यः तान्त्रिकस्य कर्मणि सहमतिः दर्शनीया इति चिन्तितवान् कपाली। शान्तिकर्मणि तान्त्रिकस्य दक्षिणा कियती इति पृष्टः तान्त्रिकः एकं हरीतकीफलम् अस्य कर्मणः दक्षिणा इति अवदत्। कपालिनः निरीक्षा आसीत् यत् तान्त्रिकः अधिकं धनं याचिष्यते। तेन तस्य कपटता प्रकटिता स्यात्। किन्तु तान्त्रिकस्य वचनेन कपाली प्रभावितः। कपाली तस्मै हरितकीफलद्वयं प्रतिशृणुते। किन्तु अधिकं गृहीतं चेत् मन्त्रापराधः स्यात् इति उक्त्वा तान्त्रिकः तद् अपि निराकरोत्। एतेन समधिकं प्रभावितं कपालिनं तान्त्रिकः अवदत् यत् विघ्ननाशाय क्रियमाणं शान्तिकर्म मासत्रयं यावद् चलिष्यति। तत्र घटे पञ्चरत्नदानकाले यत् सुवर्णं दीयते तत् त्रिगुणितं भविष्यति। एतद् उक्त्वा स नाम्ना परिचितयोः कस्यचित् दैवज्ञस्य अनुग्रहात् लब्धधनयोः द्वयोः विशिष्टयोः धनिकयोः नाम उक्त्वा तयोः धनलाभे सहायकः स एव इति प्रत्यपादयत्।

ततः तान्त्रिकः अवदत् यत् एतस्य कर्मणः सफलतायै मासत्रयं परिवारसदस्यैः चिपिटकचर्वणव्रतं परिपालनीयम्। अत्र व्रते सर्वे अपि मासत्रयं यावत् केवलं चिपिटकम् एव भक्षयेयुः इति नियमः। एतेन मासत्रयं यावद् गृहे व्यये न्यूनतां परिलक्ष्य सन्तुष्टः कपाली तान्त्रिकाय सुवर्णं दातुं सिद्धः अभवत्। यद्यपि परीक्षायै स आदौ एकतोलकं सुवर्णम् एव दातुम् ऐच्छत् किन्तु तान्त्रिकः तं कल्पितेन शास्त्रवचनेन अबोधयत् यत् स्वर्णत्रैगुण्यकर्मणि दश, विंशतिः इत्येवं शून्ययुताङ्कमितं सुवर्णम् एव देयम् अन्यथा सर्वनाशः भवेत्। उपायान्तरम् अप्राप्य कपाली दश तोलकानि सुवर्णस्य दातुम् अङ्गीकृतवान्।

घटे सुवर्णं स्थापयित्वा वस्त्रेण आच्छाद्य तान्त्रिकः आफिम-निद्राचूर्णादिमिश्रितं घटजलं कपालिने प्रादात्। तेन मूर्छां गतः कपाली। तदा तान्त्रिकः क्षणादेव कलशात् स्वर्णम् अपहृत्य पलायितः। एतावता अल्पबुद्धिः पङ्गुरामः गृहं प्रविश्य कर्तारं सुखेन निद्राणं दृष्ट्वा पार्श्वे पूजास्थानं कल्पितं दृष्ट्वा कपालिनः पादुकायुगलम् आसने स्थापयित्वा पादुकादेव्याः प्रीत्युत्पादनाय पूजां प्रारब्धवान्। यतः पादुकायाः कारणाद् एव तस्य महत् कष्टं जातम् आसीत्। स्वयम् अलक्ष्यतया स्थितः तान्त्रिकः एतत् दृष्ट्वा झटिति गृहं प्रविश्य कपालिनं जागरयित्वा अवदत् यत् दासस्य स्पर्शेन घटस्थितं सुवर्णं जले द्रवीभूतम् अस्ति इति।

भीतः चिन्तितः कपाली पुनः तान्त्रिकेण सान्त्वितः। तान्त्रिकः उक्तवान् यत्, पुनः यदि विंशतिः तोलकानि सुवर्णस्य दास्यति कपाली तर्हि तत् षष्टितोलकं भवेत्। नष्टं धनम् अपि कपाली स्वयं तदीया भार्या वा नूनम् एव प्राप्स्यति।

वस्तुतः तान्त्रिकः बहिः गत्वा घटात् अपहृतं सुवर्णं प्रतिवेशिने दत्त्वा रङ्गिण्यै तस्य दानाय असूचयत्। प्रतिवेशी अपि दशतोलकमितं स्वर्णं रङ्गिण्यै समर्पितवान्। एतेन रङ्गिण्याः अपि चिपिटकचर्वणे श्रद्धा उत्पन्ना। रङ्गिणी स्वगतम् एतद् वदन्ती गृहं प्रविश्य प्रकाशम् अवोचत् यत् पत्युः जीवनरक्षायै सा अवश्यमेव चिपिटकचर्वणव्रतं पालयिष्यति इति। तावता भृत्यौ अपि तथा कर्तुं सिद्धौ जातौ।

# सम्भाविताः दीर्घप्रश्नाः
## विषयवस्तुगताः प्रश्नाः

१. चिपिटकचर्वणम् इति प्रहसनस्य कथावस्तु स्वभाषया समासेन लिखत।
२. कपाली किमर्थं शुना दष्टः? तेन किं जातम्?
(१, प्रश्नयोः उत्तरं 'प्रहसनस्य कथावस्तु' इति अंशात् सङ्गृह्य स्वयं लिखन्तु।)
३. अहो धर्मज्ञानं प्रखरं ते इति कः कस्मै कस्मिन् प्रसङ्गे कथितवान्?
४. प्रवहतु भक्तिगङ्गा तव मां निश्चिहं निमज्जयितुम् इति कः कस्मै कस्मिन् प्रसङ्गे कथितवान्?
५. अरे सर्वस्वनाशिनि पतिद्वेषिणि इति कस्मिन् प्रसङ्गे कः कस्मै उक्तवान्?
(३. ४. ५ इति अङ्कैः निर्दिष्टानां प्रश्नानाम् उत्तरं "वाचं संयच्छ नोचेत् तव कण्ठरोधं करिष्यामि- इदं वाक्यं केन कस्मै कदा उक्तम्?" इति प्रश्नस्य उत्तरम् अनुसृत्य लिखन्तु।)
६. कपालिनः चिकित्सार्थम् आगतस्य वैद्यस्य कीदृशः अनुभवः जातः?
(अस्य प्रश्नस्य उत्तरं "छत्रं तथा पादुकायुगलं मे नष्टं चिराय इति कः कस्मिन् प्रसङ्गे उक्तवान्?" इति प्रश्नस्य उत्तरम् अनुसृत्य लिखन्तु।)
७. तन्मनः कर्दमवन्मर्दयन् निष्कासयामि सलिलवत् किञ्चिद् धनम् इति कः किमर्थम् उक्तवान्?
(अस्य प्रश्नस्य उत्तरं "तान्त्रिकस्य बुद्धिमत्तां वर्णयत।?" इति प्रश्नस्य उत्तरम् अनुसृत्य लिखन्तु।)
८. चिपिटकचर्वणम् इति प्रहसने कपालिनः चरित्रं यथा प्रकाशितं तद् वर्णयत।

९. चिपिटकचर्वणम् इति प्रहसने रङ्गिण्याः चरित्रं यथा प्रकाशितं तद् वर्णयत।
१०. चिपिटकचर्वणम् इति प्रहसने तान्त्रिकस्य चरित्रं यथा प्रकाशितं तद् वर्णयत।
११. चिपिटकचर्वणम् इति प्रहसने समाजस्य यादृशं चित्रं प्रतिभाति तद् वर्णयत।
(७, ८, ९, १० प्रश्नानाम् उत्तराणि भूमिकाभागे पश्यन्तु)
१२. नष्टचन्द्रदर्शनं नाम किम्? कस्मिन् प्रसङ्गे इदं केन कथितम्?
१३. कोजागरपूर्णिमायाः परिचयं प्रयच्छत।
(११, १२ प्रश्नयोः उत्तरं "प्रहसने प्रतिपादितयोः प्रथयोः परिचयः" इति अंशे वर्तते)

## नान्दीश्लोकगताः प्रश्नाः

१. चिपिटकचर्वणस्य नान्दीश्लोकस्य व्याख्यानं कुरुत।
२. चिपिटकचर्वणस्य नान्दीश्लोके कस्याः देवतायाः स्तुतिः अस्ति इति सयुक्तिकं प्रतिपादयत।
३. चिपिटकचर्वणस्य नान्दी कीदृशी नान्दी इति सविस्तरं प्रतिपादयत।
४. चिपिटकचर्वणस्य नान्दीश्लोके के अलङ्काराः सन्ति इति विस्तारेण विवेचयत।
५. चण्डक्रियारुचिरखण्डितहास्यलेशा इत्यस्य व्याख्यानं कुरुत।

## श्लोकगताः प्रश्नाः

१. चिपिटकचर्वणस्य भरतवाक्यं व्याख्यात।
२. कोजागरे चिपिटचर्वणकर्मणा इत्यादिश्लोकं व्याख्यात।
३. कोजागरे चिपिटचर्वणकर्मणा इत्यादिश्लोके कानि सन्ध्यङ्गानि

सन्ति इति विवृणुत।
४. कोजागरे चिपिटकचर्वणस्य परम्परां विवृणुत।
५. पितामहस्मृतिपूतम् इति श्लोकं व्याख्यात।
६. नमोऽस्तु पतिदेवाय इति श्लोकं व्याख्यात।
७. आतपवर्षात्राणम् इति श्लोकं व्याख्यात।
८. अद्भुतं द्रव्यम् उद्भूतम् इति श्लोकं व्याख्यात।
९. श्वदन्तक्षतम् इति श्लोकं व्याख्यात।
१०. अद्भुतं द्रव्यम् उद्भूतम् इति श्लोकं व्याख्यात।
११.आत्मानं मन्यते इति श्लोकं व्याख्यात।
१२. प्राणेषु नादरो यस्य इति श्लोकं व्याख्यात।
१३. तिन्तिडीगुडयोगो वा इति श्लोकं व्याख्यात।
१४. सक्तुं चिपिटकं चैव इति श्लोकं व्याख्यात।
१५. जलार्द्रञ्च चिपिटकम् इति श्लोकं व्याख्यात।
१६. कुकुरीव ललज्जिह्वा इति श्लोकं व्याख्यात।
१७. अङ्कः शून्ययुतो ग्राह्य इति श्लोकं व्याख्यात।
१८. घट त्वं धर्मरूपोऽसि इति श्लोकं व्याख्यात।

## नाट्यतत्त्वानुसारिणः प्रश्नाः

१. चिपिटकचर्वणं रूपकभेदेषु कुत्र अन्तर्भवति?
२. चिपिटकचर्वणम् इति प्रहसने सन्धीनां विवरणं कुरुत।
३. चिपिटकचर्वणम् इति प्रहसने अर्थप्रकृतीनां विवरणे कुरुत।
४. नाट्यशास्त्रानुसारेण प्रहसनस्य चरितानां वर्णनं कुरुत।